# Shri Krishna Stavanam

# શ્રીકૃષ્ણસ્તવનમ્

## Document Information

Text title : Shri Krishna Stavanam

File name : kRRiShNastavanam.itx

Category : vishhnu, vishnu, moropanta, stava, krishna, shataka

Location : doc_vishhnu

Author : Mayurakavi or Moropanta

Proofread by : Rajesh Thyagarajan

Description/comments : Stotras composed by Moropanta mayUrakavi

Latest update : December 23, 2023

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 23, 2023

*sanskritdocuments.org*

# શ્રીકૃષ્ણસ્તવનમ્

(ગીતિવૃત્તમ્)

કેશવ! કે શવતુલ્યા ન સ્વયિ વિમુખાઃ સ્વલા મલાકારાઃ ?
ભક્તાસ્તવ સક્તાઃ સ્તવનતિપૂજાસુ પ્રભો! ન કે ધન્યાઃ? ॥ ૧॥

માધવ! સાધવ એવ ત્વયશસિ રતા ન દુર્જના મલિનાઃ ।
(૧)હંસા ઇવ નો દૃષ્ટા મૌક્તિકકવલારતા બકાઃ કાકાઃ ॥ ૨॥

યત્યાદૃકથ! ભગવન્નત્યાદરતસ્ત્વમુપગતાછરણમ્(૨) ।
નત્યા સકૃદપિ કૃતયા સત્યાનન્દપ્રદો ભવસિ સદ્યઃ ॥ ૩॥

યસ્સાધુગીતયા ત્વં કીર્ત્યા નિજયાપિ દેવ! । મુદમેષિ ।
તત્તાં તબ પ્રિયાર્થં ગાતુમહં પ્રેમતઃ પ્રવૃત્તોઽસ્મિ ॥ ૪॥

દત્વા વિષમપરિમિતં લબ્ધં ત્વત્તોઽમૃતં નુ પૂતનયા ।
(૩)પૂતનયાઽધ વૃતસ્ત્વં કીર્ત્યા તત એવ નિત્યનૂતનયા ॥ ૫॥

(૪)યઃ સતિ સાધુઃ સ તથા ન યથાઽસતિ સાધુરીડ્ય એષ સતામ્ ।
સદસિ કથયન્તિ કવયઃ પાપોદ્ધૃતિમેવ વિસ્મરન્તિ ન તામ્ ॥ ૬॥

અયિ ! કે ત્વયિ કેશવ! ન હિ વિનતા (૫)વિનતાતનૂજવાહ! જનાઃ ।
કંસારે! કં સારે પીતે તે યશસિ ન ચ (૬)પુમર્થમિતાઃ ॥ ૭॥

અજગરમજ(૭) ગરનિધિમરિમત્યુગ્રં પ્રસ્તસારમશિશુવરસમ્ ।
અકરોરમૃતનિધિં કિં ન કરો દાતા જનાયતે સુહૃદે ॥ ૮॥

અમુના યમુનામિવ મે મતિમપદોષાં પદા(૮) કદા કર્તા ।
વદ ભો મદભોગિમથન ! પૃચ્છામિ યતસ્ત્વમાદૃતો યશસિ ॥ ૯॥

કુરુ કુરુવર(૯) ઇવ પતિતે મયિ શરતલ્પ ઇવ દેવ! । સંસારે ।
કરુણાં કરુણાવરુણાલય ! વરદગુરો! મુકુન્દ ! કંસારે! ॥ ૧૦॥

જાનન્નપ્યહમહિતૈઃ પ્રસભં વિષયૈર્જનૈઃ સ (૧૦)ધર્મ ઇવ ।

ક્રીડિતુમલં પ્રવૃત્તસ્ત્વં દીનાનાં સ એવ બન્ધુરસિ ॥ ૧૧॥

કામાદિભિરહિતૈર્મે મતિરુગ્રૈઃ કૌરવૈરિવ પ્રસભં ।
ધર્મસ્ય વધૂરિવ હાઽન્યાયાદ્વિવશીકૃતા ત્વયા રક્ષ્યા ॥ ૧૨॥

કંસારાતે! કીર્તિઃ કં સારા તે જનં ન પાતુમલમ્ ।
(૧૧) વસુધાધારાદ્ય વિભો! ન (૧૨)સુધાધારા ક્ષમાવિતું રુગ્ણમ્ ॥ ૧૩॥

ય ઉપાયનં પ્રદાતું (૧૩)પૃથુકપ્રસૂતિ ત ઉપગતો, ભવતા ।
અવતા સ દીનબન્ધોઽકારિ સુદામા પદં મુદામાશુ ॥ ૧૪॥

કવિના ન વિના વ્રજતિ ખ્યાતિં, બહ્વપિ યશઃ પ્રભોર્જાતુ ।
મુદિતમતઃ કુરુ માં કવિમવિગીતકથા યથાસુખં ગાતુમ્ ॥ ૧૫॥

પીતાંશુક ! ગીતા શુકકવિના વાલ્મીકિનેવ રામસ્ય ।
રસિકાઃ પિયન્તિ ભવતઃ કીર્તિં દેવાઃ સુધામિવાજસ્રમ્ ॥ ૧૬॥

સાધુ શુકેનેવ પુનર્ગીતાનિ યશાંસિ તે મયૂરેણ ।
ખ્યાતિં પ્રયાન્તુ લોકે ભોઃ ! કે બદ્ધાદરા ન (૧૪)નવ્યરસે ? ॥ ૧૭॥

સ્તોતુમનસમકરોઃ કિલ ગલ્લે સ્પૃષ્ટ્વા ધ્રુવં ધ્રુવં દરતઃ(૧૫)
તદ્વન્મામાદરતઃ કુરુ પુરુકરુણાર્ય નિજનુતૌ નિપુણમ્ ॥ ૧૮॥

નુતિકૃતિકૃતાદરસ્ત્વં સદસિ સતાં શ્રુતમિતિ શ્રુતિજ્ઞાનાં ।
ત્વાં તેન તે નમજનમન્દારં પ્રાર્થયે નમન્નઙ્ઘ્રિમ્ ॥ ૧૯॥

નનુ તે ન નુતેરધિકં મતમન્યદ્યદિ તદિષ્ટમેવ તવ ।
વિતર વરં મય્યાશ્રિતહિત રવરઞ્જિતજગત્સ્વવંશેન(૧૬) ॥ ૨૦॥

સ્તુત્વાસ્તુ ત્વામયમિહ સંસારે ભોઃ પ્રભો! । જનો ધન્યઃ ।
યાચે યતસ્ત્વમિચ્છાં પૂરયસિ સુખં વદાન્યમૂર્ધન્યઃ ॥ ૨૧॥

યેનાર્થિકામપૂર્તિઃ ક્રિયતે વલુ ઝટિતિ પારિજાતન ।
સ મયા કથં નુ રમયા પૂજિતમપહાય તે પદં સેવ્યઃ? ॥ ૨૨॥

ભવદાશ્રિતૈઃ સ (૧૭) લભ્યસ્ત્વં તુ ન જાત્વપિ તદાશ્રિતૈર્ભગવન્! ।
ભામાદ્વારિ સ સતતં ન ભવાન્ સ્થિત ઇન્દ્રમદિરાન્તરપિ ॥ ૨૩॥

તં જડમવિવેકિનમગમસ્વાધીનં(૧૮) સમાશ્રયિષ્યતિ કઃ ।
ત્વાં પ્રભુમપાસ્ય સર્વગમાદિકવિં કરુણમખિલકામકરમ્ ॥ ૨૪॥

અન્તર્બહિરપિ કઠિનશ્ચિતામણિરુપક એવ ખલ્વેષઃ ।
કામધુગપિ પશુરશુભં ભવતોઽન્યન્નાથ સર્વમસ્માકમ્ ॥ ૨૫॥

બ્રહ્માદયોઽપિ દેવાઃ કૃચ્છ્રે(૧૯) ત્વાં દેવદેવમુપયાન્તિ ।
સગદા(૨૦) જગદાધાર! (૨૧)પ્રાજ્યામૃતપાણિમિવ ગુરું ભિષમામ્ ॥ ૨૬॥

યઃ પુરદાહં ચક્રે શક્રેણ પ્રાર્થિતઃ પ્રભુઃ(૨૨) સપદિ ।
સોઽપિ વૃકવ્યસનાસ્કિલ વિલયં ગત એવ રક્ષિતો ભવતા ॥ ૨૭॥

ભીતાંસ્ત્રાતું દાતું વરમભિલષિતં સમસ્તમર્થિભ્યઃ ।
અનલસમનલસમં (૨૩) ખલશલભલયે ત્વાં વદન્તિ સત્કવયઃ ॥ ૨૮॥

ગજમમ્બુજન્તુશક્રાન્નકાચ્ચક્રાયુધાવતા(૨૪) ભવતા ।
દત્તમનુક્ત્વાપ્યભયં સંસારગ્રાહપીરિતેભ્યો(૩૨૫) નઃ ॥ ૨૯॥

નારાયણેત્યજામિલ આક્રુશ્યાપત્યમત્યપત્યમતિઃ ।
ત્વાં પ્રાપ પાપનિલયઃ કિલ યઃ (૨૬)શતકલ્પનિરયવાસાર્હઃ ॥ ૩૦॥

ત્વામહમનિશં (૨૭)કલયે કલયે યહત્તસાધ્વસોઽસિ ત્વં ।
(૨૮)પ્રણતેર્યત્ના અવમા અવ મામિત્યાનતં દયાલુમણે! ॥ ૩૧॥

એકસ્ત્વમેવ શાશ્વત આસ્સે સુખમબ્જનાભ! । યદનલ્પે ।
કલ્પેઽખિલલોકાનાં ભો ભગવન્ ! ભોગિભોગમયતલ્પે ॥ ૩૨॥

નાથ કથઙ્કારં તે મહિમાનમગાધમિમમહો! । બ્રૂમઃ ।
યત્વત્તત્વવિચારેઽચાદ્યાસ્તે પ્રભુરચચ્ચલ ભ્રૂમઃ ॥ ૩૩॥

ગોપ્યા કોઽપ્યામસ્તે પાંસુલયાપિ પ્રસાદ ઈશ્વરતઃ ।
સત્યાપ્યત્યાદૃતયા (૨૯) ન મયા ન મયાદ(૩૦) ઉચ્યતેઽપ્યખિલૈઃ ॥ ૩૪॥

બદ્ધોઽસ્યુલૂખલે ત્વં ગોપ્યા હન્ત! । વ્રજે સ દામ્ના યં ।
જ્ઞાતું કવયો ન વયોગતમપિ પશ્યન્તિ ખલુ સદાઽઽન્નાયમ્ ॥ ૩૫॥

(૩૧)અવતારાતિભ્યો જગદવતારા દેવ! । યે ગૃહીતાસ્તે ।
માધુરતઃ સાધુરતઃ કોઽપિ નતેષ્વિહ તુ સૂદ્ધૃતા બહવઃ ॥ ૩૬॥

ઇહ ગોકુલં વ્રતં તે શિશવોઽપ્યસવઃ કુમારિકાઃ શ્રુતયઃ ।
ગોપા ગુરવઃ પરમેશ્વર કિં બહુનારયઃ પ્રિયાતિથયઃ ॥ ૩૭॥

(૩૨)માથુરમવતારામિમં મન્યેઽખિલકામકરુપતરુમેવ ।
વસ્તુ સકલમેકરસીકર્તું દ્રુતમસ્તિ જગતિ ન રુમેવ ॥ ૩૮॥

ભુક્તં સહ પશુપશિશુભિરુક્તં કૃતમેવ ગોપવામદૃશાં ।
મુક્તં ચાશ્રુ વિયોગે યુક્તં ભગવત્યદઃ કિમાત્મરતે ? ॥ ૩૯॥

ભક્તાનાં પુરતસ્વાં નર્સયતીત્થં સ્વભક્તવત્સલતા ।
ન વ્યાપૂતો ભવાનિવ કોઽપિ કુટુમ્બી ક્વચિત્ કુટુમ્બે સ્વે ॥ ૪૦॥

પાર્થસહાયસ્ય ન તે કા વા રીતિઃ કુટુમ્બિરીતિરિવ?
દૂતત્વં સૂતત્વં ભજતો વ્રજતોઽનૃતેન ચાપિ પથા ॥ ૪૧॥

સક્તં સપત્નમથનં ભક્તં ભજતા કિરીટિનં પાર્થે ।
વ્યક્તં નિજમાહિતત્વં ત્યક્તં સ્વીકૃત્ય સાધુ સારથ્યમ્ ॥ ૪૨॥

સોઢ્વાપ્યાયાસમરં સમરં ગત્વાઽસુસંશયં પ્રાપ્ય ।
લુબ્ધેનેવ સ્વાર્થઃ પાર્થઃ પરિરક્ષિતસ્ત્વયા વ્યસને ॥ ૪૩॥

ભઙ્ગે શ્રીકાન્ત ! નવે શાન્તનવે(૩૩) પ્રકુપિતે પ્રતિજ્ઞાયાઃ ।
પ્રાપ્તસ્તથા ન કમ્પં ત્વં પઙ્કજનેત્ર ! હૃદિ યથા સખ્યુઃ ॥ ૪૪॥

ઉપનિષદાં સર્વસ્વં મૂર્તં શ્રેયઃ શ્રિયઃ સતાં સત્વં ।
(૩૪)વપુરાપગેયસમરેઽનાદૃતમિષુવિક્ષતં ન તે મિત્રમ્ ॥ ૪૫॥

શ્રિતમવતસ્તવ ભીષ્માદ્રથચક્રભૃતઃ ક્ષતપ્રતિજ્ઞાભ્ય ।
અદ્યાપિ સત્યસન્ધૈરપ્યુચ્ચૈર્ગીયતે યશઃ સદસિ ॥ ૪૬॥

(૩૫)ભગવન્નૂનં નૂનં શ્રિતસમવનતોઽન્યદખિલમપિ કર્મ ।
પરિપાલયન્યદેકલમર્જુનમસિ સર્વથા સતામીડ્યઃ ॥ ૪૭॥

ભક્તં નક્તન્દિવમપિ (૩૬)કપિકેતું નેતુમીપ્સિતાં પદવીં ।
કિં કિં ન રક્ષતા કૃતમુપ્ત કિં કિં કારિતં ન વાન્યૈસ્તે ॥ ૪૮॥

ધર્મો યદવદદનૃતં યદકાણ્ડેઽદર્શનં જગામ રવિઃ ।
યદભજદિષુતલ્પં કુરુગુરુરન્યદ્યચ્ચ તત્તવૈવ મતમ્ ॥ ૪૯॥

ધર્મદ્વિષોઽનુસરણે ન રણેઽપિ ધનુભૃતાં ગુરોર્વિજયઃ ।
ધર્મસ્ય તુ ધ્રુવં સોઽશસ્ત્રસ્યાપીતિ ત ઉપદિષ્ટમિહ ॥ ૫૦॥

યદ્યત્કૃતં ત્વયેશ્વર જીવાનામાશુ તત્સમુદ્ધૃતયે ।
શ્રુતવેચ્છયા નૃમૂર્ત્યા શ્રીસખ્યા શૃણ્વતઃ સતાં ધૃતયે(૩૭) ॥ ૫૧॥

બદ્ધોપ્યા રાધિકયારાધિ (૩૮)કયાધૂસુતેન ચાપ્યન્તઃ ।

હૃતભવગદં પદં તે ધ્યાયન્તિ વિમુક્તિપદમપિ ન સન્તઃ ॥ ૫૨॥

રાધામાધાયોરસિ બાધા માધાગ્નિ કામજા હૃત્વા ।
સુપ્તં ગુપ્તં સતમઃપુઞ્જે કુઞ્જે સ્મરન્તિ યતયસ્ત્વામ્ ॥ ૫૩॥

ગોપીર્ભુક્ત્વાપિ વિટૈઃ કૃત્વાપિ ન દસ્યુભિઃ (૩૯)સમ સ્તેયં ।
હૃત્વાપિ ધાતુકૈસ્ત્વં જગતિ ગુણસ્તેઽદ્ભુતઃ સમસ્તેઽયમ્ ॥ ૫૪॥

યાસાં સ્વયા સુસઞ્ચિતમપહૃતમેકાન્તતોઽપિ નવનીતં ।
તાભિરબલાભિરપિ વદ મનસિ હૃતે દેવ! કિં ન તવ નીતમ્ ॥ ૫૫॥

રાધાસ્તનનિહિતદૃશં ગલદમલસ્તન્યબિન્દુવદનેન્દું ।
ત્વાં ધ્યાયત્યન્તઃશ્રીઃ સાધુસભા સાશ્રુ (૪૦)સાત્મકુસ્સમપિ ॥ ૫૬॥

ત્વામધિકદમ્બમબલાપટુપટપાટચ્ચરં(૪૧) વિલિખ્ય યથા ।
સત્યઃ પ્રત્યહમાત્મવતસંસિદ્ધ્યૈ ભજતિ પતિમસ્યઃ ॥ ૫૭॥

દીપમિવ ત્વાં સ્નેહાદુદ્ભાસિતરૂપસમ્પદં ગોપ્યઃ ।
અભજન્પતઙ્ગિકા ઇવ મરણભયમપાસ્ય રુચિરરુચિરુચયઃ ॥ ૫૮॥

(૪૨) મૃત્સ્નાશનાગસિ વિભો! । ભીતાયા વિશ્વદર્શનાન્માતુઃ ।
સ્વસ્મિન્દુર્લભપુત્રસ્નેહાપાયાત્વમેવ બહુભીતઃ ॥ ૫૯॥

હા! । બત! હન્ત! પિબન્તં ત્વામમૃતનિધિં દ્રુતં નિરસ્ય ભુવિ ।
યાતા માતા બહુમતદુગ્ધા, મુગ્ધાઃ ખલુ મિથો જાત્યા ॥ ૬૦॥

દુગ્ધે મુગ્ધે કિમધિકમમ્બ! । ત્વં બત! સુવઞ્ચિતાસીતિ ।
જ્ઞાપયિતુમેવમેવ ત્વં ગોરસભાજનેઽકરોઃ કોપમ્ ॥ ૬૧॥

ગુરુભિરપિ ગુરુવરેણ ચ ભવતા યે બોધિતાઃ ક્રતૌ ગુરવઃ ।
હત કથં તેઽપ્યન્ધા બન્ધાવહમેવ યૈર્વૃતં કર્મ ॥ ૬૨॥

ધન્યા મન્યામહ ઇહ તા રામાઃ(૪૩) સસ્કૃતોઽસિ મામિસ્ત્વં ।
અજ્ઞપતીનાં નૌકાઃ સત્યઃ સત્યઃ સ્તુતિર્ન માહિમાસામ્ ॥ ૬૩॥

શ્રીકરધૃતો જડોઽપિ પ્રાપ યશો જગતિ (૪૪)પર્વતઃ સ (૪૫) તતં ।
(૪૬)તદુર્દિનમપ્યભવત્સાધુમતં પુણ્યપર્વતઃ સતતમ્ ॥ ૬૪॥

કરુણામૃતધન ! કરુણામૃતવૃષ્ટ્યા તે જિતૈવ સા વૃષ્ટિઃ ।
(૪૭)જડજાપ્યધઃ પતન્તી હેતુઃ પઙ્કસ્ય યા ચ કમ્પસ્ય ॥ ૬૫॥

ગોવર્ધનધર! તવ (૪૮)ભુજવીક્ષાક્ષણવિસ્મૃતાત્મના સ્ત્રીણાં ।
અપિ (૪૯) ખરશબ્દા અબ્દાઃ શમ્પાઃ કમ્પાય નાભવન્મનસઃ ॥ ૬૬॥

ત્રાસેન સહોસ્ખાતઃ સુહૃદાં સમમુદ્ધૃતો ગવાં પુચ્છૈઃ ।
અવતારિતઃ પુનર્ગિરિરિન્દ્રમદભરેણ સાકમીશ્વર ! તે ॥ ૬૭॥

(૫૦)ભૂગોલભૃદ્ભુજગમનમનુકુર્વન્(૫૧) લીલયા ધૃતાહાર્યઃ ।
ઉચ્ચૈર્બભૌ ભુજસ્તે છત્રસ્ય મહેન્દ્રનીલદણ્ડ ઇવ ॥ ૬૮॥

વપુષઃ કાન્ત્યા મેઘાસ્તવ કરકારાશયઃ(૫૨) સ્મિતપ્રભયા ।
તરિતોઽપિ વાસસા ખલુ પીતા (૫૩) ભીતા ભુજાદ્ ધ્રુવં વાતાઃ ॥ ૬૯॥

પર્વતધરેણ ભવતા વનધરો લીલયાદ્રિભિદ્વિજિતઃ ।
આસ્તાં ગિરિરપિ હરિરપિ જેતુમલં ત્વં તૃણેન કાલમપિ ॥ ૭૦॥

(૫૪)ગોત્રારેર્વજભૃતઃ ક્રુદ્ધાદ્રિરિરેકલોઽપ્યપક્ષોઽપિ(૫૫)
પ્રાપ્તો જયં ન ભઙ્ગં સત્પુરુષભુજાશ્રિતો ન કો વિજયી? ॥ ૭૧॥

અમિતાપરાધશમનં નમનં તવ પાદયોઃ સકૃદ્વિહિતં ।
વ્યતિરેકોઽર્થાન્તરન્યાસશ્ચ ।
કિં દ્રાગિન્દ્રાહૂરીકર્તુમઘમતોઽન્યદદ્ભુતં તીર્થમ્ ॥ ૭૨॥

આગસ્કૃત્સુ નમત્સુ દ્રાક્કુરુષે ત્વં ક્ષમાં ભૃશં કરુણઃ ।
અપરાધિના ન ચેત્કિં કવચં તવ ચણ્ડકાલભીતિજુષામ્ ॥ ૭૩॥

ત્રાતો ન કસ્તૃણાદિર્જીવસ્તે સ્વપદરેણુના દરતઃ ।
કશ્ચ ચરઃ સંસારાન્મશકાદિર્મધુરવેણુનાદરતઃ ॥ ૭૪॥

યશ્ચુંવિતસ્ત્વયાનિશમીશ્વર! । પરમાદૃતેન વંશસ્તં(૫૬)
મન્યે રમાધરાદ્ધરમિહ માધુર્યં સદા નવં શસ્તમ્ ॥ ૭૫॥

જગતા સમમનુભૂતં માધુર્યં ચુમ્બતા ત્વયા યસ્ય ।
સ વરં શ્રિયોઽધરાદિતિ વદતા કવિના શ્રિયઃ કિમપરાદ્ધં ? ॥ ૭૬॥

કાસ્તાઃ સ્ત્રિયો ન નીતા વંશેન (૫૭)સ્થાણુભાવમમુના યાઃ ।
અન્યાસાં કૈવ કથા? સુકવિશુક (૫૮)સ્તમ્ભમાહ યમુનાયાઃ ॥ ૭૭॥

એણો(૫૯) ન કેવલં તવ વેણો રવમોહિતો ભુજઙ્ગોઽપિ ।
હિંસ્રોઽપિ દેવ! બહુના કિં (૬૦)સ્રોતશ્ચારિજન્તુનિકરોઽપિ ॥ ૭૮॥

(૬૧) ઘુસદાં સુમોહિતા રવમધુ પાયયતા ચ વેણુના સત્યઃ ।

પિદધે શ્રુતી શયાભ્યાં યાસાં મુખમીક્ષ્ય મઙ્ક્ષુ નામત્યઃ ॥ ૭૯॥

વંશો રાકાજાનેરંશોરપિ(૬૨) તાપનાશકો મધુરઃ ।
કોઽપ્યોઘ (૬૩) એષ વહતા ગોપ્યો દૂરં હૃતા રસૈર્યેન ॥ ૮૦॥

ભગદં જગદન્તર્વહિરસ્તુ સમ્મુત્તવ(૬૪) યશોઽમૃતં પીત્વા ।
 ઇતિ ભગવત્યપરાદ્ધું વિધિના ખલુ વત્સવત્સપાન્હરતા ॥ ૮૧॥

તદનુભવાક્તોર્બ્રૂમો વયમદ્ભુતમેવ હન્ત મોહસ્તં ।
નિન્યે વશમાકૃષ્ય દ્યુમણિમિવ નિજં ગૃહં તમોહસ્તમ્ ॥ ૮૨॥

પિત્રા ગવાં રસાસ્તે તવ પુત્રેણ તુ સપાલકા વત્સાઃ ।
તચ્ચરિતેન તુ સકલા ગોપા ગોપ્યો વયં સુરાશ્ચ હૃતાઃ ॥ ૮૩॥

સ કથં નિદ્યઃ કવિભિઃ સંસ્થાપયિતું પદે પ્રશસ્તે નઃ ।
(૬૫)યોઽમૃતસાગરફેનસ્તેનમિહ તતાન તે યશસ્તેનઃ ॥ ૮૪॥

(૬૬)કૃચ્છાદ્યદદિત્યાતં દુર્લભમતુલૈસ્તપોવ્રતૈશ્ચીર્ણૈઃ ।
પ્રાપ્તા ગોપ્યો ગાવસ્તચ્છ્રભૂત્વં ભિયો જગન્માતુઃ ॥ ૮૫॥

યદોગોપ્યો ગાવસ્ત્વામાપુરપસ્યમીશ્વરં જગતઃ ।
ન ગતઃ કિમિહોત્કર્ષં વિધ્યપરાધોઽપિ(૬૭) નાકિનાં નગતઃ ॥ ૮૬॥

અઙ્ગીકૃતા યદા તે ગોગોપીનાં જગદ્ગુરો! । સુતતા ।
મૂર્તિર્ન કેવલં તવ જાતા સત્કીર્તિરપિ જગત્સુ તતા ॥ ૮૭॥

વિધિપશુપશુપસમદૃશા (૬૮) ગોપકરાયત્તબન્ધમોક્ષણ ।
વસાયિતેન ભગવન્ ! દામ્ન્યર્પિતકન્ધરેણ તૃણમશિતમ્ ॥ ૮૮॥

તેષાં યત્સ્વતનુભુવા(૬૯) ધનમપહૃતમીશ! । સત્યપતિનાપિ ।
તેષાં તદનૂનાધિકમાત્મધનં તેઽર્પિતં સદીડ્યેન ॥ ૮૯॥

(૭૦)સવસંસ્કૃતહવિષોઽપિ પ્રાપિતમુચ્ચૈઃ પદં ત્વયા યવસં ।
ભવસન્તરણેચ્છુરહં હન્ત તૃણેષ્વપિ તદા નતેશ્વવસમ્ ॥ ૯૦॥

હા હન્ત ! । તં તમન્તર્ભાવયતોઽનુગ્રહં બજે ભવતઃ ।
મમ તદપાત્રસ્ય મનઃ કિં તાં ચિન્તા બ્રવીમિ યાં યાતમ્ ॥ ૯૧॥

વત્સીભૂતં બ્રહ્મ બ્રહ્મપ્રમુખૈર્મહાત્મભિવિશ્ચિન્ત્યં ।
ત્વાં ગોગોપીગોપાઃ પુપુષુઃ પ્રેમ્ણાન્તનૌ ચ રોમાઞ્ચમ્ ॥ ૯૨॥

સ્વર્ગાદ્ગુરુ સત્યપદં સત્યપદાદ્ગુરુતરં ચ વૈકુણ્ઠં ।
વૈકુણ્ઠાદપિ ગુરુતમમવનૌ વૃન્દાવનં વનં મન્યે ॥ ૯૩॥

યાઃ પૂર્વં ન ક્વચિદપિ કસ્મૈચિદપિ પ્રદર્શિતાઃ પ્રભુણા ।
અત્રૈવ પીતપટ! તા અટતા નટતા ત્વયા કલાઃ સકલાઃ ॥ ૯૪॥

યૌ કમલાવક્ષસ્યપિ વક્ષોજસ્પર્શભૂરિરક્તત લૌ ।
તૌ તવ વૃન્દાવનભુવિ ચઙ્ક્રમણં ચક્રતુશ્ચિરં ચરણૌ ॥ ૯૫॥

વૃન્દાવનેઽનુભૂતં ગોપૈર્ગોપીભિરપિ ચ યદ્ગોભિઃ ।
તન્નન્દનેઽપિ ન સુરૈર્નાનન્દવનેઽપિ પણ્ડિતૈઃ શર્મ ॥ ૯૬॥

ચરણસરોજરજોભિર્દેવસરિસ્કતિપયૈઃ પુરા પ્રાપ્તૈઃ ।
મહિમાનમિયન્તમિતા વૃન્દાવનભૂઃ કિમઙ્કિતા પદકૈઃ ॥ ૯૭॥

તૃણગુલ્મવ્રતતિદ્રુમદૃષદો વૃન્દાવનેઽત્ર ધૂલિરપિ ।
સર્વં તીર્થશતાધિકમીશ્વર! (૭૧)તીર્થાઙ્ઘ્રિણા કૃતં ભવતા ॥ ૯૮॥

ભોઃ ! કતમો લોકતમો બાહ્યં હર્તું ક્ષમોઽન્ય આદિત્યાત્ ।
તેજસ્વિપૂજ્યપાદાત્ આન્તરમપિ લોકબન્ધુતસ્ત્વત્તઃ ॥ ૯૯॥

કુમ્ભ(૭૨)ભુવામ્ભોધિરિવ સ્વેન નિરુપમેન તેજસા યશસા ।
શૌરિભુવા ભવતા દ્રાગપ્યયમપ્યયમલં ભવો નીતઃ ॥ ૧૦૦॥

ગોપોઽપિ પણ્ડિતાનાં સર્વેષાં સમ્મતઃ સદા નન્દઃ ।
યત્તૈરલબ્ધગન્ધસ્ત્વમપિ તદઙ્કં ગતઃ સદાનન્દઃ ॥ ૧૦૧॥

જગતિ યશોદાનન્દૌ ધન્યૌ શિશુના ત્વયા જગદ્ગુરુણા ।
(૭૩)ઉક્તાવાશ્લિષ્ય ગલે યૌ શતકૃત્વસ્ત્વયામ્બ! તાતેતિ ॥ ૧૦૨॥

વૃદ્ધૈરલમન્યૈર્નો મૈત્રી ભવતૈવ ગોપશિશુનાઽસ્તાં ।
વૃદ્ધસખા યામાપ્તાસ્ત્વત્તો મુદમાશ્વપીહ પિશુનાસ્તામ્ ॥ ૧૦૩॥

(૭૪)યમભૃતમુચો વરં નિજકિસલયતોઽમંસ્ત દેવવિટપી તં ।
તં ઘોષયોપિદધરં વિટેન ભવતા પીતં ધન્યં ।
કિં ઘોષયોપિદધરં ધન્યં બ્રૂમો ન દેવ વિટપીતમ્ ॥ ૧૦૪॥

દ્રાગ્દ્રવતિ ધીઃ શ્રુતે તે યશસિ યથા નસ્તથા ન વેદાન્તે ।
લબ્ધરતિઃ સ્વપિતિ ભુવિ ન પલ્યઙ્કેઽપીતરા(૭૫) ન વેદાન્તે ॥ ૧૦૫॥

ત્વાં સગુણં બ્રહ્મ વયં નિર્ગુણમપિ નાથ સંશ્રિતાઃ કવયઃ ।

રુચિવૈચિત્ર્યાદેકેઽલઙ્કૃતિમિવ હેમ કેવલમિવાન્યે ॥ ૧૦૬॥

કૈવલ્યં પદમાપ્તા યે ભક્તા યે ચ વિદ્વિષસ્તવ તે ।
તેન શ્રિતા વયં ત્વાં બ્રૂમો ભગવન્! પ્રભો! નમો ભવતે ॥ ૧૦૭॥

સકલં(૭૬) સ્વવયઃ કવયસ્તવ યત્ર વયસ્યમમૃતકરમહસઃ ।
સુયશઃ કાલે દેશે વ્યવહારે તનયન્તિ તત્રૈવ ॥ ૧૦૮॥

સરસિ સરોજમિવ ત્વયિ હૃદયમિદં નઃ સુજીવને વસતુ ।
તત્ર(૭૭) શ્રીરિવ ભક્તિશ્ચાત્રાપિ પરન્તુ માત્ર સેવ ચલા ॥ ૧૦૯॥

ગીત્યા મૃગ ઇવ કુશલૈઃ કામી પ્રભુરિવ સુરૂપયાર્પિતયા ।
ભક્ત્યા ભાગવતૈસ્ત્વં ભગવન્ ! બહુભિર્વશીકૃતોઽસ્યાશુ ॥ ૧૧૦॥

હૃશ્રસ્તં(૭૮) કસ્ય કવેઃ કાલાચ્છુતરત્નસાનુકમ્પસ્ય ।
તવ સંશ્રયેઽગ્ર પાદૌ શ્રિતચિન્તારત્નસાનુકમ્પસ્ય ॥ ૧૧૧॥

ઇતિ શ્રીરામનન્દનમયૂરવિરચિતં શ્રીકૃષ્ણસ્તવનં સમ્પૂર્ણમ્ ।

ટિપ્પણિ

૧। યથા હંસા મૌક્તિકાનાં કવલેચ્છાદૃતા દૃષ્ટાસ્તથા દુર્જના ઇવ બકાઃ મલિના ઇવ કાકાશ્ચ નો દૃષ્ટા ન દૃષ્ટાઃ ઇત્યન્વયઃ ।

૨। ઉપગતાન્ શરણમિતિ પદચ્છેદઃ ।

૩। પૂતનયા પવિત્રયા । પવિત્રાર્થે પૂતનશબ્દો ન કુત્રાપિ દૃષ્ટચરઃ ।

૪। યથા અસતિ દુર્જને સાધુઃ સતામીડ્યો ભવતિ ન તથા સતિ સત્પુરુષે સાધુરિત્યન્વયઃ ।

૫। વિનતાતનૂજો વૈનતેયો વાહઃ વાહનં યસ્ય તત્સમ્મુદ્ધૌ ।

૬। પુમર્થં પુરુષાર્થં ધર્માર્થકામમોક્ષાખ્યમ્ ।

૭। અજ હે કૃષ્ણ । ગરસ્ય વિષસ્ય નિધિમ્ ।

૮। ત્વપદસઞ્ચરણેન યમુનામિવ ત્વદ્વસત્યા મે મતિમપદોષાં વિગતદોષાં કદા
કર્તા કરિષ્યસીતિ યોજના ।

૯। શરતલ્પે પતિતે કુરુવરે ભીષ્મે ।

૧૦। ધર્મો યુધિષ્ઠિરઃ । અહિતૈર્જનૈઃ કૌરવૈઃ ।

૧૧। વસુધાધાર આદ્ય ઇતિ સમ્બુદ્ધિસ્થં પદદ્વયમ્ ।

૧૨। સુધાધારા રુગ્ણમવિતું રક્ષિતું ક્ષમા ન કિમિતિ પ્રશ્નઃ । ક્ષમૈવેત્યર્થઃ ।

૧૩। પૃથુકાનાં પ્રસતિમ્ । તે ઉપગતસ્ત્વામુપગત ઇત્યર્થઃ ।

૧૪। નવ્યે રસે સર્વેઽપિ બદ્ધાદરા ઇત્યર્થઃ ।

૧૫। શઙ્ખેન ગલે સ્પૃષ્ટ્વા ત્વં ધ્રુવાખ્યં વાલં ધ્રુવં નિશ્ચિતં સ્તોતુમનસમકરોરિતિ યોજના ।

૧૬। સ્વવંશેન સ્વવેણુનિર્ગતેન રવેણ રાજિતં જગદ્યેન તત્સમ્બુદ્ધૌ । સાપેક્ષત્વેઽપિ ગમકત્વાત્સમાસઃ ।

૧૭। સ પારિજાતઃ ।

૧૮। અગં વૃક્ષં પારિજાતમિતિ યાવત્ । વ્યતિરેકેણ પારિજાતાદ્ભગવાનેવ શ્રેષ્ઠ ઇતિ સૂચ્યતે ।

૧૯। કૃચ્છ્રે સઙ્કટે ।

૨૦। સગદાઃ સાતઙ્કા ભીતા ઇત્યર્થઃ ।

૨૧। અમૃતહસ્તં ધન્વન્તરિમિત્યર્થઃ ।

૨૨। પ્રભુઃ શિવઃ । વૃકો ભસ્માસુરઃ ।

૨૩। ખલા એવ શલભાસ્તેષાં લયે વિનાશેઽનલસમમગ્નિસદૃશમ્ ।

૨૪। અમ્બુ-જન્તુષુ જલજન્તુષ શક્રાત્ શ્રેષ્ઠાત્ ।

૨૫। “ષડ્ર્ગગ્રાહપીડિતેભ્યઃ” ઇતિ પાઠાન્તરં। ષડ્ર્ગઃ કામાદીનાં સમૂહઃ ।

૨૬। શતં કલ્પાન્ નિરયવાસં નરકવાસમર્હતીતિ તાદૃશઃ ।

૨૭। કલયે મનસિ કરોમિ ચિન્તયામીત્યર્થઃ ।

૨૮। પ્રણતેર્યત્નાઃ અવમાઃ અપરિત્યાજ્યાઃ । સદા મયા પ્રણતિઃ કાર્યૈવેત્યર્થઃ ।

૨૯। “અત્યાનતયા” ઇતિ પાઠાન્તરમ્ ।

૩૦। મયા અદઃ ઇતિ પદચ્છેદઃ ।

૩૧। અરાતિભ્યો રિપુભ્યઃ ।

૩૨। મથુરાયાં ભવમ્ ।

૩૩। ભીષ્મે ।

૩૪। આપગેયો ભીષ્મસ્તેન સહ સમરે ।

૩૫। ભગવન્ ઊનં ઇતિ પદચ્છેદઃ ।

૩૬। અર્જુનમ્ ।

૩૭। પ્રમોદાય ।

૩૮। કયાધૂસુતઃ પ્રહ્લાદઃ ।

૩૯। સમઃ સ્તેયમિતિ પદચ્છેદઃ । વિટૈર્ન દસ્યુભિઃ સમઃ ત્વં સ્તેયં કૃત્વાપીતિ યોજના ।

૪૦। સાત્મકુત્સમાત્મનો નિન્દયા સહિતં યથા સ્યાત્તથા ।

૪૧। સ્તેનમ્ ।

૪૨। મૃત્સ્નાયા મૃત્તિકાયાઃ અશનેન ભક્ષણેન યદાગઃ યોઽપરાધસ્તસ્મિન્ ।

૪૩। ઋષિપત્ન્યઃ ।

૪૪। ગોવર્ધનગિરિઃ ।

૪૫। વ્યાપ્તમ્ ।

૪૬। મેઘચ્છન્નમહઃ ।

૪૭। ઉલયોરભેદાજ્જલજા । પઙ્કસ્ય કમ્પસ્ય ચ હેતુરિત્યન્વયઃ ।

૪૮। ભુજવીક્ષાયાં ક્ષણં વિસ્મૃતઃ આત્મા યાભિસ્તાસામ્ ।

૪૯। ગર્જન્તઃ ।

૫૦। શેષં ઇત્યનેન નકારસ્યાનુનાસિકો લકારઃ કવિના ન પ્રયુક્તઃ ।

૫૧। અત્ર “તોલિં”। ઇત્યનેન નકારસ્યાનુનાસિકા લકારઃ કવિના ન પ્રયુક્તઃ ।

૫૨। કરકા વર્ષોપલાસ્તાસા રાશયઃ ।

૫૩। પીતાઃ પીતવર્ણાસ્તડિતઃ ।

૫૪। ગોત્રાણાં પર્વતાનામરેરિન્દ્રાત્ ।

૫૫। પુરા પર્વતાનાં પક્ષા આસંસ્તે ચ મહેન્દ્રેણ ચ્છિન્ના ઇતિ કથાત્ર લક્ષ્યતે ।

૫૬। વેણુઃ ।

૫૭। સ્થાણોઃ સ્તમ્ભસ્ય ભાવં ધર્મ સ્તબ્ધતામિનિ યાવત્ ।

૫૮। યમુનાયા જલમપિ નિશ્ચલમાસીદિત્યાહેત્યર્થઃ ।

૫૯। હરિણઃ ।

૬૦। જલચરસમૂહઃ ।

૬૧। યાસાં મુખં વીક્ષ્ય પુરા નાસત્યોઽશ્વિનીકુમારઃ પાણિભ્યાં મઙ્ક્ષુ સપદિ શ્રુતી શ્રોત્રે પિદધે પિહિતવાસ્તા ઘુસદાં દેવાનાં સત્યોઽપિ સ્ત્રિયોઽપિ રવમધુ પાયયતા વેણુના સુમોહિતા નિતરાં મોહિતા ઇત્યર્થઃ ।

૬૨। અંશોઃ કિરણાત્ । જ્યોત્સ્નાયા ઇત્યર્થઃ ।

૬૩। એષ વેણુરવસ્ય કોઽપ્યપૂર્વ એવ ઓઘઃ પ્રવાહઃ । યેન વહતા રસૈઃ શ‍ૃઙ્ગારાદિભિર્જલૈશ્ચ ગોપ્યો દૂરં હૃતાઃ “દૂરં ગોપ્યો વહતા રસૈર્હૃતા યેન” ઇતિ પાઠાન્તરમ્ ।

૬૪। મુદા સહિતં યથા તથા ।

૬૫। અમૃતસાગરસ્ય દુગ્ધસાગરસ્ય યઃ ફેનસ્તસ્ય સ્તેનં ચૌર્યકરમ્ । તતોઽપ્યધિકં ધવલમિત્યર્થઃ ।

૬૬। યત્ અદિત્યા આપ્તમિતિ પદચ્છદઃ। દેવજનન્યા યત્ કૃચ્છ્રાદાપ્તમિત્યન્વયઃ ।

૬૭। વિધેર્બ્રહ્મણઃ અપરાધસ્ત્વાં ગોપીનાં પુત્રં વિદધતો વિધેરપરાધ એવ । સ તુ તાસાં નાકિનાં નગતઃ કલ્પવૃક્ષાદપ્યધિકં ફલમદાદિત્યપરાધસ્યોત્કર્ષઃ ।

૬૮। “સમકરુણ” ઇતિ પાઠાન્તરમ્ ।

૬૯। સ્વપુત્રેણ બ્રહ્મણા ।

૭૦। સવે યો સંસ્કૃતાદ હવિષોઽપિ । યવસં તૃણમ્ ।

૭૧। તીર્થ ક્ષેત્રં અઘ્રી યસ્ય તેન ।

૭૨। કુમ્ભભુવા અગસ્ત્યેન ।

૭૩। યૌ યશોદાનન્દૌ ત્વયા અમ્બ ! તાત ! ઇતિ શતકૃત્વો ગલે સમાશ્વિષ્યોક્તૌ ઇત્યન્વયઃ ।

૭૪। યં દેવવિટપી કલ્પવૃક્ષોઽમૃતં મુઞ્જતા નિજપલ્લવાદ્ધરમંસ્ત ન બ્રૂમઃ કિમિતિ પ્રશ્નઃ ।

૭૫। “પ્યન્યથા” ઇતિ સાધુઃ પાઠઃ। (મયૂરકવિઃ)

૭૬। કવયો યત્રામૃતકરમહસો વયસ્યં તવ સુયશો યત્ર કાલે દેશે

વ્યવહારે ચ વર્તતે તત્રૈવ તત્સકલં સ્વવયો નયન્તીત્યન્વયઃ ।

૭૭। ત્વયિ શ્રીરિવ નો ભક્તિર્વસતુ । સા ભક્તિસ્તુ સા શ્રીરિવાત્ર ત્વયિ ચલા માસ્તુ ઇતિ યોજના ।

૭૮। હે શ્રિતાનાં ચિન્તારત્ન ચિન્તામણે ! શ્રુતો રત્નસાનોર્મેરોઃ કમ્પો યેન તાદૃશસ્ય કસ્ય કવેઃ પણ્ડિતસ્ય કાલાન્મૃત્યોસ્ત્રસ્તં ભીતં હૃન્મનઃ સાનુકમ્પસ્ય કરુણાવતસ્તવ પાદૌ ન સંશ્રયેત્ । સર્વસ્યાપિ મનસ્તે પાદૌ સંશ્રયેદેવેત્યર્થઃ ।

Proofread by Rajesh Thyagarajan

---

*Shri Krishna Stavanam*

pdf was typeset on December 23, 2023

Please send corrections to *sanskrit@cheerful.com*